ॐ नमो भगवते सदाशिवाय सकल-तत्त्वात्मकाय सकल तत्त्वविहाराय सकल लोकैककर्त्रे सकल लोकैकभर्त्रे सकल लोकैकहर्त्रे सकल लोकैकगुरवे सकल लोकैकसाक्षिणे सकल निगमगुह्याय सकलवर प्रदाय सकल दुरितार्त्तिभञ्जनाय सकल जगद् भयङ्कराय सकल लोकैक शङ्कराय शशाङ्क शेखराय शाश्वत निजाभासाय निर्गुणाय निरूपमाय निरूपाय निराभासाय निरामयाय निष्प्रपञ्चाय निष्कलङ्काय निर्द्वन्द्वाय निस्सङ्गाय निर्मलाय निर्गमाय नित्यरूपविभवाय निराधाराय नित्यशुद्ध बुद्धपरिपूर्ण-सच्चि-दानन्दाद्वयाय परमशान्त प्रकाश तेजोरूपाय जय जय महारुद्र महारौद्र भद्रावतार दुःखदावदारण महाभैरव कालभैरव कल्पान्त भैरव कपाल-मालाधर खट्वाङ्ग-खड्ग-चर्म-पाशांकुश-डमरू-शूल-चाप-बाण-गदा-शक्ति-भिन्दिपाल-तोमर-मूसल-मुद्गर-पट्टिश परशु-परिघ-भुशुण्डी-शतघ्नी-चक्रा-द्यायुध-भीषणकर सहस्रमुख दंष्ट्राकराल निकटाट्टहास-विस्फारित-ब्रह्माण्ड-मण्डल नागेन्द्र कुण्डल नागेन्द्र हार नागेन्द्रवलय नागेन्द्रचर्मधर मृत्युञ्जय-

त्र्यम्बक त्रिपुरान्तक विरूपाक्ष विश्वेश्वर विश्वरूप वृषभवाहन विभूषपण विश्वतोमुख सर्वतो रक्ष रक्ष मां ज्वल ज्वल।

महामृत्युभयमपमृत्युभयं नाशय नाशय रोगभय मुत्सादयोत्सादय विषसर्पभयं शमय शमय चोरान्मारय मारय मम शत्रूनुच्चाऽयोच्चाटय त्रिशूलेन विदारय विदारय कुठारेण भिन्धि भिन्धि खड्गेन छिन्धि छिन्धि खट्वाङ्गेन विपोथय विपोथय मुसलेन निष्पेषय निष्पेषय वाणैः सन्ताडय सन्ताडय रक्षांसि भीषय भीषय भूतानि विद्रावय विद्रावय कूषमाण्ड-वेताल-मारीगण-ब्रह्मराक्षसान् सन्त्रासय सन्त्रासय ममाऽभयं कुरु कुरु वित्रस्तं मामाऽऽश्वासया-ऽऽश्वासय नरक भयान्मामुद्धारयोद्धारय सञ्जीवय सञ्जीवय क्षुत्तृड्भ्यांमामाप्यायया प्यायय दुःखातुरं मामानन्द-यानन्दय शिव कवचेन मामाच्छादयाच्छदय त्र्यम्बक सदाशिव! नमस्ते नमस्ते नमस्ते।

ॐ जिनका वाचक है, सम्पूर्ण तत्त्व जिनके स्वरूप हैं, जो समस्त तत्त्वों में विचरण करने वाले, समस्त लोकों के एकमात्रकर्त्ता और सम्पूर्ण विश्व के एकमात्र भरण-पोषण करने वाले हैं जो अखिल विश्व के एक ही संहारकारी, सब लोकों के एकमात्र गुरु, समस्त संसार के एक ही साक्षी, सम्पूर्ण वेदों के गूढ़ तत्त्व, सबको वर देने वाले, समस्त पापों और पीड़ाओं का नाश करने वाले, सारे संसार को अभय देने वाले, सब लोकों के एक-मात्र कल्याणकारी, चन्द्रमा का मुकुट धारण करने वाले, अपने सनातन प्रकाश से प्रकाशित होने वाले, निर्गुण, उपमारहित, निराकार, निराभास, निरामय, निष्प्रपञ्च, निष्कलंक, निर्द्वन्द्व, निस्संग, निर्मल, गतिशून्य, नित्य रूप, नित्य वैभव से सम्पन्न, अनुपम, ऐश्वर्य से सुशोभित, आधार शून्य, नित्य शुद्ध-बुद्ध, परिपूर्ण, सच्चिदानन्दघन, अद्वितीय तथा परम शान्त, प्रकाशमय, तेजःस्वरूप हैं उन भगवान सदाशिव को नमस्कार है। हे महारुद्र, महारौद्र, भद्रावतार, दुःदावाग्नि-विदारण, महाभैरव-कालभैरव-कल्पान्तभैरव, कपालमालाधारी! हे खट्वाङ्ग, खड्ग, ढाल, फन्दा, अंकुश, डमरू, त्रिशूल, धनुष, बाण, गदा, शक्ति, भिन्दिपाल, तोमर, मूसल, मुग्दर, पट्टिश, परशु, परिघ, भुशुण्डी, शतघ्नी और चक्र आदि आयुधों के द्वारा भयंकर हाथों वाले, हजार मुख और दंष्ट्रा से कराल,

विकट अट्टहास्य से विशाल, ब्रह्माण्ड-मण्डल का विस्तार करने वाले, नागेन्द्र वासुकि को कुण्डल, हार, कंकण तथा ढाल के रूप में धारण करने वाले, मृत्युञ्जय-त्रिनेत्र-त्रिपुरनाशक, भयंकर नेत्रों वाले, विश्वेश्वर, विश्वरूप में प्रकट, बैल पर सवारी करने वाले, विष को गले में भूषण रूप में धारण करने वाले तथा सब ओर मुख वाले शंकर ! आपकी जय हो, जय हो । मेरे महामृत्यु भय का नाश कीजिए, नाश कीजिए, (बाहरी और भीतरी) रोग भय को जड से मिटा दीजिए, जड से मिटा दीजिए, विष और सर्प के भय को शान्त कीजिए, शान्त कीजिए, चोर को मार डालिए मार डालिए, मेरे (काम क्रोधादि, लोभादि भीतरी तथा इन्द्रियों के और शरीर के द्वारा होने वाले पाप कर्म रूपी बाहरी) शत्रुओं का उच्चाटन कीजिए, उच्चाटन कीजिए, त्रिशूल के द्वारा विदारण कीजिए, विदारण कीजिए, कुठार के द्वारा काट डालिए, काट डालिए। खंग के द्वारा छेद डालिए, छेद डालिए, खट्वांग के द्वारा नाश कीजिए, नाश कीजिए, मूसल के द्वारा पीस डालिए, पीस डालिए और बाणों के द्वारा बींध डालिए, बींध डालिए। आप (मेरी हिंसा करने वाले) राक्षसों को भय दिखाइये, भय दिखाइये। भूतों को भगा दीजिए, भगा दीजिए। कूष्माण्ड, वेताल, मारियों और ब्रह्म राक्षसों को सन्त्रस्त कीजिए, सन्त्रस्त कीजिए। मुझको अभय दीजिए, अभय दीजिए। मुझ अत्यन्त भयभीत को आश्वासन दीजिए, आश्वासन दीजिए। नरक भय से मेरा उद्धार कीजिए, उद्धार कीजिए। मुझे जीवनदान दीजिए, जीवनदान दीजिए। क्षुधा-तृषा का निवारण करके मुझ को आप्यायित कीजिए, आप्यायित कीजिए। आपकी जय हो, जय हो। मुझ दुःखातुर को आनन्दित कीजिए, आनन्दित कीजिए। शिव कवच से मुझे आच्छादित कीजिए, आच्छादित कीजिए। त्र्याम्बक सदाशिव ! आपको नमस्कार है, नमस्कार है, नमस्कार है।

ऋषभ उवाच

इत्येतत् कवचं शैवं वरदं व्याहृतं मया ।
सर्वबाधा प्रशमनं रहस्यं सर्वदेहिनाम् ॥

ऋषभ जी कहते हैं—इस प्रकार यह वरदायक शिव कवच मैंने

कहा है। यह सम्पूर्ण बाधाओं को शान्त करने वाला तथा समस्त देह-धारियों के लिए गोपनीय रहस्य है।

यः सदा धारयेन्मर्त्यः शैवं कवचं उत्तमम्।
न तस्य जायते क्वाऽपि भयं शम्भोरनुग्रहात्॥

जो व्यक्ति इस उत्तम शिव कवच को सदा धारण करता है उसे भगवान शिव के अनुग्रह से कभी और कहीं भी भय नहीं होता।

क्षीणायुर्मृत्युमापन्नो महारोगहतोऽपिवा।
सद्यः सुखमवाप्नोति दीर्घामायुश्च विन्दति॥

जिसकी आयु क्षीण हो चली हैं, जो मरणासन्न हो गया है या जिसे महान रोगों ने मृतक-सा कर दिया है, वह भी इस कवच के प्रभाव से तत्काल सुखी हो जाता है और दीर्घायु प्राप्त कर लेता है।

सर्वदारिद्रयशमनं सौमङ्गल्यविवर्धनम्।
यो धत्ते कवच शैवं स देवैरपि पूज्यते॥

यह शिव कवच समस्त दरिद्रता का शमन करने वाला और सौमंगल्य को बढ़ाने वाला है, जो इसे धारण करता है वह देवताओं से भी पूजित होता है।

महापातक संघातैर्मुच्यते चोपपातकैः।
देहान्ते शिवमाप्नोति शिववर्मानुभावतः॥

इस शिव कवच के प्रभाव से मनुष्य महापातकों के समूहों और उप-पातकों के भय से भी छूट जाता है तथा शरीर का अन्त होने पर शिवलोक को पा लेता है।

त्वमपि श्रद्धया वत्स शैवं कवचमुत्तमम्।
धारयस्व मया दत्तं सद्यः श्रेयो ह्यवाप्स्यसि॥

वत्स! तुम भी मेरे दिए हुए इस उत्तम कवच को श्रद्धापूर्वक धारण करो, इससे तुम शीघ्र और निश्चय ही कल्याण के भागी होओगे।

॥ अमोघ शिवकवचं सम्पूर्णम् ॥

मृतसञ्जीवनकवचम्

एवमराध्य गौरीशं देवं मृत्युञ्जयेश्वरम् ।
मृतसञ्जीवनं नाम कवचं प्रजपेत्सदा ॥
सारात्सारतरं पुण्यं गुह्याद्गुह्यतरं शुभम् ।

4 OCTOBER 1973 THURSDAY

Saka 10 Aswin 1895

गुरुवार ४ अक्टूबर आश्विन सुदी ८

मृतसञ्जीवनकवचम्

एवमराध्य गौरीशं देवं मृत्युञ्जयेश्वरम् ।
मृतसञ्जीवन नाम कवचं प्रजपेत्सदा ॥
सारात्सारतरं पुण्यं गुह्याद्गुह्यतरं शुभम् ।
महादेवस्य कवचं मृतसञ्जीवनामकम् ॥
समाहितमना भूत्वा शृणुष्व कवचं शुभम् ।
श्रुत्वैतद्दिव्यं कवचं रहस्यं कुरु सर्वदा ॥
वराभयकरोयज्वा सर्वदेवनिषेवितः ।
मृत्युञ्जयो महादेवः प्राच्यां पातु मां सर्वदा ॥
दधानः शक्तिमभयां त्रिमुखः षड्भुजः प्रभुः ।
सदाशिवो अग्निरूपी मामाग्नेय्यां पातु सर्वदा ॥
अष्टादशभुजोपेतो दण्डाभय करो विभुः ।
यमरूपी महादेवो दक्षिणस्यां सदाऽवतु ॥
खड्गाभयकराधीरो रक्षोगणनिषेवितः ।
रक्षोरूपी महेशो मां नैऋत्यां सर्वदाऽवतु ॥
पाशाभय भुजः सर्वरत्नाकर निषेवितः ।
वरूणात्मा महादेवः पश्चिमे मां सदाऽवतु ॥
गदाभयकरः प्राणनायकः सर्वदागतिः ।
वायव्यां मारुतात्मा मां शङ्करः पातु सर्वदा ॥
शंखाभयकरस्थो मां नायकः परमेश्वरः ।
सर्वात्मान्तरदिग्भागे पातु मां शङ्करः प्रभुः ।
शूलाभयकरः सर्वविद्यानामधिनायकः ।
ईशानात्मा तथैशान्यां पातु मां परमेश्वरः ॥

ऊर्ध्वंभागे ब्रह्मरूपी विश्वात्माऽधः रुद्राऽवतु ।
शिरो मे शङ्करः पातु ललाटं चन्द्रशेखरः ॥
भ्रूमध्यं सर्वलोकेशस्त्रिनेत्रो लोचनेऽवतु ।
भ्रूयुग्मं गिरिशः पातु कर्णौ पातु महेश्वरः ॥
नासिकां मे महादेव ओष्ठौ पातु वृषध्वजः ।
जिह्वां मे दक्षिणामूर्तिर्दन्तान् मे गिरिशोऽवतु ॥
मृत्युञ्जयो मुखं पातु कण्ठं मे नाग भूषणः ।
पिनाकी मत्करौ पातु त्रिशूली हृदयं मम ॥
पञ्चवक्त्रः स्तनौ पातु उदरं जगदीश्वरः ।
नाभि पातु विरूपाक्षः पार्श्वौ मे पार्वतीपतिः ॥
कटिद्वयं गिरिशो मे पृष्ठं मे प्रमथाधिपः ।
गुह्यं महेश्वरः पातु ममोरू पातु भैरवः ॥
जानुनी मे जगद्धर्ता जंघे मे जगदम्बिका ।
पादौ मे सततं पातु लोकवन्द्यः सदाशिवः ॥
गिरिशः पातु मे भार्यां भवः पातु सुतान् मम ।
मृत्युञ्जयो ममाऽयुष्यं चित्तं मे गणनायकः ॥
सर्वाङ्गं मे सदा पातु कालकालः सदाशिवः ।
एतत्ते कवचं पुण्यं देवतानां च दुर्लभम् ॥

फलश्रुति : मृतसञ्जीवनं नाम्ना महादेवेन कीर्तितम् ।
सहस्रावर्तनं चाऽस्य पुरश्चरणमीरितम् ॥
यः पठेच्छृणुयान्नित्यं श्रावयेत् सुसमाहितः ।
स कालमृत्युं निर्जित्य सदाऽऽयुष्यं समश्नुते ॥
हस्तेनवा सदास्पृष्ट्वा मृतं सञ्जीवयत्यसौ ।
आधयो व्याधयस्तस्य न भवन्ति कदाचन ॥
कालमृत्युमपि प्राप्तमसौ जयति सर्वदा ।
अणिमादि गुणैश्वर्यं लभते मानवोत्तमः ॥
युद्धारम्भे पठित्वेदमष्टाविंशतिवारकम् ।
युद्धमध्ये स्थितः शत्रुः सद्यः सर्वैर्न दृश्यते ॥

न ब्रह्मादीनि चास्त्राणि क्षयं कुर्वन्ति तस्य वै ।
विजयं लभते देवयुद्धमध्येऽपि सर्वदा ॥
प्रातरुत्थाय सततं यः पठेत् कवचं शुभम् ।
अक्षय्यं लभते सौख्यमिह लोके परत्र च ॥
सर्वव्याधि विनिर्मुक्तः सर्व रोग विवर्जितः ।
अजरामरणो भूत्वा सदा षोड्षवार्षिकः ॥
विचरत्यखिलांल्लोकान् प्राप्य भोगांश्च दुर्लभान् ।
तस्मादिदं महागोप्यं कवचं समुदाहृतम् ।
मृतसञ्जीवनं नाम्ना दैवतैरपि दुर्लभम् ॥

॥ इति श्री वसिष्ठ प्रणीतं मृतसंजीवनी कवचं ॥

शिवाष्टोत्तर शतनामावलि

शिवो महेश्वरः शम्भुः पिनाकी शशिशेखरः ।
वामदेवो विरूपाक्षः कपर्दी नील लोहितः ।
शङ्करः शूलपाणिश्च खट्वाङ्गी विष्णुवल्लभः ।
शिपिविष्टो अम्बिकानाथः श्रीकण्ठो भक्तवत्सलः ॥
भव शर्वस्त्रिलोकेशः शितिकण्ठः शिवाप्रियः ।
उग्रः कपाली कामारिरन्धकासुर सूदनः ॥
गङ्गाधरो ललाटाक्षः काल काल कृपानिधिः ।
भीमः परशुहस्तश्च मृगपाणिर्जटाधरः ॥
कैलाशवासी कवची कठोरस्त्रि पुरान्तकः ।
वृषाङ्की वृषभारूढो भस्मोद्धूलित विग्रहः ॥
सामप्रियः स्वरमय स्त्रयीमूर्तिरनीश्वरः ।
सर्वज्ञः परमात्मा च सोम सूर्य-ऽग्नि लोचनः ॥
हविर्यज्ञमयः सोमः पञ्चवक्त्रः सदाशिवः ।
विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः ॥
हिरण्यरेता दुर्धर्षो गिरीशो गिरीशोऽनघः ।
भुजङ्ग भूषणो भर्गो गिरिधन्वा गिरिप्रियः ॥
कृत्तिवासाः पुरारातिर्भगवान् प्रमथाधिपः ।
मृत्युञ्जयः सूक्ष्मतनुर्जगद्व्यापी जगद्गुरुः ॥
व्योमकेशो महासेन जनकश्चारु विक्रमः ।
रुद्रो भूतपतिः स्थाणुरहिर्बुध्न्यो दिगम्बरः ॥

अष्टमूर्तिरनेकात्मा सात्त्विकः शुद्धविग्रहः ।
शाश्वतः खण्ड परशु रजः पाश विमोचनः ॥
मृडः पशुपतिर्देवो महादेवोऽव्ययो हरिः ।
पूषदन्तभिदव्यग्रो दक्षाध्वरहरो हरः ॥
भगनेत्रभिदव्यक्तः सहस्राक्षः सहस्रपात् ।
अपवर्ग प्रदोऽनन्तस्तारकः परमेश्वरः ॥

दारिद्रय् दहन शिवस्तोत्रम्

विश्वेश्वराय नरकार्णव तारणाय, कर्णामृताय शशिशेखर धारणाय।
कर्पूरकन्ति धवलाय जटाधराय दारिद्रय् दुःख दहनाय नमः शिवाय॥
गौरीप्रियाय रजनीश कलाधराय कालान्तकाय भुजगाधिपकंकणाय।
गङ्गाधराय गजराज विमर्दनाय दारिद्रय् दुःख दहनाय नमः शिवाय॥
भक्तप्रियाय भवरोग भयापहाय् उग्राय दुर्गभाव सागर तारणाय।
ज्योतिर्मयाय गुणनामसुनृत्यकाय दारिद्रय् दुःख दहनाय नमः शिवाय॥
चर्माम्बराय शवभस्म विलेपनाय, भालेक्षणाय मणिकुण्डलमण्डिताय।
मंजीर पाद युगलाय जटाधराय, दारिद्रय् दुःख दहनाय नमः शिवाय॥
पञ्चाननाय फणिराज विभूषणाय, हेमांशुकाय भुवनत्रय मण्डिताय।
आनन्दभूमि वरदाय तमोमयाय, दारिद्रय् दुःख दहनाय नमः शिवाय॥
भानु प्रियाय भवसागर तारणाय, कालान्तकाय कमलासन पूजिताय।
नेत्रत्रयाय शुभलक्षणलक्षिताय, दारिद्रय् दुःख दहनाय नमः शिवाय॥
रामप्रियाय रघुनाथ वरप्रदाय, नागप्रियाय नरकार्णवतारनाय।
पुण्येषू पुण्यभरिताय सुरार्चिताय दारिद्रय् दुःख दहनाय नमः शिवाय॥
मुक्तेश्वराय फलदाय गणेश्वराय, गीतप्रियाय वृषभेश्वर वाहनाय।
मातङ्ग चर्मवसनाय महेश्वराय दारिद्रय् दुःख दहनाय नमः शिवाय॥
वसिष्ठेनकृतं स्तोत्रं सर्वरोग निवारणं,
सर्वसम्पत्करं शीघ्रं पुत्र पौत्रादि वर्धनम।
त्रिसंध्यं यः पठेनित्यं सहि स्वर्गमवाप्नुयात्॥

॥ इति श्री वसिष्ठ विरचितं दारिद्रयदहन स्तोत्रम् ॥

शिवरक्षास्तोत्रम्

विनियोग—अस्य श्री शिवरक्षास्तोत्रमन्त्रस्य याज्ञवल्क्य ऋषिः, श्री सदाशिवो देवता, अनुष्टुप् छन्दः श्री सदाशिवप्रीत्यर्थं शिवरक्षास्तोत्र जपे विनियोगः—

चरितं देवदेवस्यमहादेवस्य पावनम् ।
अपारं परमोदारं चतुर्वर्गस्य साधनम् ॥

देवाधिदेव भगवान शंकर का यह चरित्र, परम पवित्र, अपार अत्यन्त उदार एवं चतुर्वर्ग (धर्म-अर्थ, काम-मोक्ष) को देने वाला है ।

गौरी विनायकोपेतं पञ्चवक्त्रं त्रिनेत्रकम् ।
शिवं ध्यात्वादशभजं शिवरक्षां पठेन्नर ॥

पांच मुख वाले, तीन नेत्र वाले, दश भुजाओं वाले शिव का गौरी और विनायक (गणेश) जी सहित ध्यान करके साधक पुरुष को शिवरक्षा स्तोत्र का पाठ करना चाहिए ।

गङ्गाधरः शिरः पातु भालमर्धेन्दु शेखरः ।
नयने मदनध्वंसी कर्णौ सर्पविभूषणः ॥

गंगाधर शिव मेरे सिर की, अर्धचन्द्रधारी मेरे कपाल की, कामदेव को भस्म करने वाले (मदनध्वंसी) मेरे दोनों नेत्रों की तथा सापों के आभूषण धारण करने वाले (सर्पविभूषणः) मेरे दोनों कानों की रक्षा करें ।

घ्राणं पातु पुरारातिर्मुखं पातु जगत्पतिः ।
जिह्वां वागीश्वरः पातु कन्धरां शितिकन्धरः ॥

त्रिपुरासुर का वध करने वाले (पुराराति) मेरी नाक की, जगत्पति मेरे मुख की वागीश्वर मेरी जिह्वा की शितिकन्धर मेरी ग्रीवा की रक्षा करें ।

दारिद्र्यदहन शिवस्तोत्रम्

विश्वेश्वराय नरकार्णव तारणाय, कर्णामृताय शशिशेखर धारणाय।
कर्पूरकन्ति धवलाय जटाधराय दारिद्र्य् दुःख दहनाय नमः शिवाय॥
गौरीप्रियाय रजनीश कलाधराय कालान्तकाय भुजगाधिपकंकणाय।
गङ्गाधराय गजराज विमर्दनाथ दारिद्र्य् दुःख दहनाय नमः शिवाय॥
भक्तप्रियाय भवरोग भयापहाय् उग्राय दुर्गभाव सागर तारणाय।
ज्योतिर्मयाय गुणनामसुनृत्यकाय दारिद्र्य् दुःख दहनाय नमः शिवाय॥
चर्माम्बराय शवभस्म विलेपनाय, भालेक्षणाय मणिकुण्डलमण्डिताय।
मंजीर पाद युगलाय जटाधराय, दारिद्र्य् दुःख दहनाय नमः शिवाय॥
पञ्चाननाय फणिराज विभूषणाय, हेमांशुकाय भुवनत्रय मण्डिताय।
आनन्दभूमि वरदाय तमोमयाय, दारिद्र्य् दुःख दहनाय नमः शिवाय॥
भानु प्रियाय भवसागर तारणाय, कालान्तकाय कमलासन पूजिताय।
नेत्रत्रयाय शुभलक्षणलक्षिताय, दारिद्र्य् दुःख दहनाय नमः शिवाय॥
रामप्रियाय रघुनाथ वरप्रदाय, नागप्रियाय नरकार्णवतारनाय।
पुण्येषू पुण्यभरिताय सुरार्चिताय दारिद्र्य् दुःख दहनाय नमः शिवाय॥
मुक्तेश्वराय फलदाय गणेश्वराय, गीतप्रियाय वृषभेश्वर वाहनाय।
मातङ्ग चर्मवसनाय महेश्वराय दारिद्र्य् दुःख दहनाय नमः शिवाय॥
वसिष्ठेनकृतं स्तोत्रं सर्वरोग निवारणं,
सर्वसम्पत्करं शीघ्रं पुत्र पौत्रादि वर्धनम।
त्रिसंध्यं यः पठेनित्यं सहि स्वर्गमवाप्नुयात्॥

॥ इति श्री वसिष्ठ विरचितं दारिद्र्यदहन स्तोत्रम् ॥

शिवरक्षास्तोत्रम्

विनियोग—अस्य श्री शिवरक्षास्तोत्रमन्त्रस्य याज्ञवल्क्य ऋषिः, श्री सदाशिवो देवता, अनुष्टुप् छन्दः श्री सदाशिवप्रीत्यर्थं शिवरक्षास्तोत्र जपे विनियोगः—

चरितं देवदेवस्यमहादेवस्य पावनम् ।
अपारं परमोदारं चतुर्वर्गस्य साधनम् ॥

देवाधिदेव भगवान शंकर का यह चरित्र, परम पवित्र, अपार अत्यन्त उदार एवं चतुर्वर्ग (धर्म-अर्थ, काम-मोक्ष) को देने वाला है ।

गौरी विनायकोतेतं पञ्चवक्त्रं त्रिनेत्रकम् ।
शिवं ध्यात्वादशभजं शिवरक्षां पठेन्तर :॥

पांच मुख वाले, तीन नेत्र वाले, दश भुजाओं वाले शिव का गौरी और विनायक (गणेश) जी सहित ध्यान करके साधक पुरुष को शिवरक्षा स्तोत्र का पाठ करना चाहिए ।

गङ्गाधरः शिरः पातु भालमर्धेन्दु शेखरः ।
नयने मदनध्वंसी कर्णे सर्पविभूषणः ॥

गंगाधर शिव मेरे सिर की, अर्धचन्द्रधारी मेरे कपाल की, कामदेव को भस्म करने वाले (मदनध्वंसी) मेरे दोनों नेत्रों की तथा सापों के आभूषण धारण करने वाले (सर्पविभूषणः) मेरे दोनों कानों की रक्षा करें ।

घ्राणं पातु पुरारातिर्मुखं पातु जगत्पतिः ।
जिह्वां वागीश्वरः पातु कन्धरां शितिकन्धरः ॥

त्रिपुरासुर का वध करने वाले (पुराराति) मेरी नाक की, जगत्पति मेरे मुख की वागीश्वर मेरी जिह्वा की शितिकन्धर मेरी ग्रीवा की रक्षा करें ।

श्रीकण्ठः पातु मे कण्ठं स्कन्धौ विश्वधुरन्धरः।
भुजौ भूभारसंहर्ता करौ पातु पिनाकधृक्॥

मेरे कण्ठ की श्रीकण्ठ, मेरे दोनों कन्धों, भूभार संहर्ता मेरी दोनों भुजाओं की तथा पिनाकधृक् मेरे दोनों हाथों की रक्षा करें।

हृदयं शङ्करः पातु जठरं गिरिजापतिः।
नाभिं मृत्युञ्जयः पातु कटिंव्याघ्राजिनाम्बरः॥

शंकर मेरे हृदय की, पेट की गिरिजापति, नाभि की मृत्युञ्जय तथा कटि की व्याघ्राजिनाम्बर रक्षा करें।

सक्थिनी पातु दीनार्त-शरणागतवत्सलः।
ऊरू महेश्वरः पातु जानुनी जगदीश्वरः॥

दीनार्त-शरणागतवत्सल मेरी समस्त हड्डियों की महेश्वर मेरे ऊरू की तथा मेरे जानु की जगदीश्वर रक्षा करें।

जंघे पातु जगत्कर्ता गुल्फौ पातु गणाधिपः॥
चरणौ करूणासिन्धु सर्वाङ्गानि सदाशिवः॥

मेरे दोनों जाघों की जगत्कर्ता, दोनों घुटनों की गणाधिप, मेरे दोनों पैरों की करूणा सिन्धु तथा सदाशिव मेरे सारे अंगों की रक्षा करें।

फलश्रुति :

एतां शिववलोपेतां रक्षां यः सुकृति पठेत्।
स भुक्त्वा सकलान् कामान् शिवसायुज्यमाप्नुयात्॥

जो साधक शिव बल से युक्त होकर इस शिवरक्षा स्तोत्र का पाठ करते हैं वे अन्त में शिवसायुज्य (मोक्ष) को प्राप्त होते हैं।

ग्रह-भूत-पिशाचाद्यास्त्रैलोक्ये विचरन्ति ये।
दूरादाशु पलायन्ते शिवनामाभिरक्षणात्॥

इस त्रिलोकी में जितने भी ग्रह-भूत-पिशाच आदि विचरण करते हैं वे मात्र इस शिवरक्षा स्तोत्र के पाठ से तत्काल दूर भाग जाते हैं।

अभयङ्कर नामेदं कवचं पार्वतीपतेः।
भक्त्या बिभर्ति यः कण्ठे तस्य वश्यं जगत्त्रयम्॥

जो साधक भक्तिपूर्वक पार्वती पति शंकर के अभयंकर नामक कवच को अपने कण्ठ में धारण करते हैं उनके तीनों लोक वशीभूत हो जाते हैं।

इमां नारायणः स्वप्ने शिवरक्षां यथाऽऽदिशत् ।
प्रातरुत्थाय योगीन्द्रो याज्ञवल्क्यस्तथाऽलिखत् ॥

जिस प्रकार भगवान नारायण ने स्वप्न में याज्ञवल्क्य ऋषि को इस कवच का उपदेश किया था, उसी प्रकार मुनि श्रेष्ठ ने उसे प्रातःकाल उठकर लिख लिया था ।

॥ इति श्री याज्ञवल्क्यकृतं शिवरक्षास्तोत्रम् सम्पूर्णम् ॥

तण्डिकृत शिवसहस्रनामस्तोत्र

वासुदेव उवाच

ततः स प्रयतो भूत्वा मम तात युधिष्ठिर ! ।
प्राञ्जलिः प्राह विप्रर्षिर्नामसंग्रहमादितः ॥

उपमन्युरुवाच

ब्रह्मप्रोक्तैर्ऋषिप्रोक्तैर्वेद-वेदाङ्ग सम्भवैः ।
सर्वलोकेषु विख्यात स्तुत्यं स्तोष्यामि नामभिः ॥
महद्भिर्विहितैः सत्यैः सिद्धैः सर्वार्थसाधकैः ।
ऋषिणा तण्डिना भक्त्या कृतैर्वेदकृतात्मना ॥
यथोक्तैः साधुभिः ख्यातैर्मुनिभिस्तत्त्वदर्शिभिः ।
प्रवरं प्रथम स्वर्ग्यं सर्वभूत हितम् शुभम् ॥
श्रुतैः सर्वत्रं जगति ब्रह्मलोकावतारितैः ।
सत्यैस्तत् परमं ब्रह्म ब्रह्मप्रोक्तं सनातनम् ॥
वक्ष्ये यदुकुल श्रेष्ठ शृणुष्वावहितो मम ।
वरयैनं भवं देवं भक्तस्त्वं परमेश्वरम् ॥
तेन ते श्रावयिष्यामि यत् तद् ब्रह्मसनातनम् ।
न शक्यं विस्तरात् कृत्स्नं वक्तुं सर्वस्य केनचित् ॥
युक्तेनापि विभूतीनामपि वर्षशतैरपि ।
यस्यादिर्मध्यमन्तं च सुरैरपि न गम्यते ॥
कस्तस्य शक्नुयाद् वक्तुं गुणान् कार्त्स्न्येन माधव ।

किंतु देवस्य महतः संक्षिप्तार्थपदाक्षरम् ॥

शक्तितश्चरितं वक्ष्ये प्रसादात तस्य धीमतः।
अप्राप्य तु ततोऽनुज्ञां न शक्यः स्तोतुमीश्वरः॥
यदा तेनाभ्यनुज्ञाताः स्तुतो वै स सदा मया।
अनादि-विधनस्याऽहं जगद्योनेर्महात्मनः॥
नाम् नाम् कंचित समुद्देशं वक्ष्याम्यव्यक्त योनिनः।
वरदस्य वरेण्यस्य विश्वरूपस्य धीमतः॥
श्रृणु नाम्नां चयं कृष्ण यदुक्तं पद्मयोनिना।
दशनामसहस्राणि यान्याह प्रपितामहः॥
तानिनिर्मथ्य मनसा दहनो घृतमिवोद्धृतम्-।
गिरेः सारं यथा हेम पुष्पसारं यथा मधु॥
घृतात सारं यथा मण्डस्तथैतत् सारमुद्धृतम्।
सर्वपापापहमिदं चतुर्वेदसमन्वितम्॥
प्रयत्नेनाधिगन्तव्यं धार्यं च प्रयतात्मना।
माङ्गल्यं पौष्टिकं चैव रक्षाघ्नं पावनं महत्॥
इदं भक्तायदातव्यं श्रद्धानास्तिकाय च।
नाश्रद्धानरूपाय नास्तिकायाऽजितात्मने॥
यश्चाभ्यसूयते देवं कारणात्मानमीश्वरम्।
स कृष्ण नरकं याति सहपूर्वैः सहात्मजैः॥
इदं ध्यानमिदं योगमिदं ध्येयमनुत्तमम्।
इदं जप्यमिदं ज्ञानं रहस्यमिदमुत्तमम्॥
यं ज्ञात्वा अन्तकालेऽपि गच्छेत परमां गतिम्।
पवित्रं मङ्गलं मेध्यं कल्याणमिदमुत्तमम्॥
इदं ब्रह्मापुरा कृत्वा सर्वलोक पितामहः।
सर्वस्तवानां राजत्वे दिव्यानां समकल्पयत्॥

तदा प्रभृति चैवायमीश्वरस्य महात्मनः।
स्तवराज इति ख्यातो जगत्यमरपूजितः॥
ब्रह्मलोकादयं स्वर्गे स्तवराजोऽवतारितः।
यतस्तण्डिः पुरा प्राप तेन तण्डिकृतोऽभवत्॥
स्वर्गाच्चैवाऽत्र भूर्लोकं तण्डिना ह्यवतारितः।
सर्वमङ्गलमाङ्गल्यं सर्वं पाप-प्रणाशनम्॥
निगदिष्ये महाबाहो! स्तवानामुत्तमं स्तवं।
ब्राह्मणामपि यद् ब्रह्म पराणामपि यत् परम्॥
तेजसामपि यत् तेजस्तपसामपि यत् तपः।
शान्तानामपि यः शान्तो द्युतीनामपि या द्युतिः॥
दान्तानामपि यो दान्तो धीमतामपि या च धीः।
देवानामपि यो देव ऋषिणामपि यस्त्वृषिः॥
यज्ञानामपि यो यज्ञः शिवानामपि यः शिवः।
रुद्राणामपि यो रुद्रः प्रभा प्रभवतामपि॥
योगिनामपि यो योगी कारणानां च कारणम्।
यतिलोकः सम्भवन्ति न भवन्ति यतः पुनः॥
सर्वभूतात्मभूतस्य हरस्यामित तेजसः।
अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु॥
यच्छ्रुत्वा मनुज व्याघ्र सर्वान् कामानवाप्स्यसि।
स्थिरः स्थाणुः प्रभुर्भीमः प्रवरो वरदो वरः॥
सर्वात्मा सर्वविख्यातः सर्वः सर्वकरो भवः।
जटी चर्मी शिखण्डी च सर्वाङ्गः सर्वभावनः॥
हरश्च हरिणाक्षश्च सर्वभूतहरः प्रभुः।
प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो ध्रुवः॥

श्मशानवासी भगवान् खचरो गोचरोऽर्दनः ।
अभिवाद्योमहाकर्मा तपस्वी भूतभावनः ॥
उन्मत्तवेषप्रच्छन्नः सर्वलोक प्रजापतिः ।
महारूपो महाकायो वृषरूपो महायशाः ॥
महात्मा सर्वभूतात्मा विश्वरूपो महाहनुः ।
लोकपालोऽन्तर्हितात्मा प्रसादोहयगर्दभिः ॥
पवित्रं च महांश्चैव नियमो नियमाश्रितः ।
सर्वकर्मा स्वयम्भूत आदिरादि करो निधिः ॥
सहस्राक्षो विशालाक्षः सोमो नक्षत्र साधकः ।
चन्द्रः सूर्यं शनिः केतुर्ग्रहो ग्रहपतिर्वरः ॥
अत्रिरत्र्या नमस्कर्ता मृगबाणार्पणोऽनघः ।
महातपा घोरतपा अदीनो दीन साधकः ॥
संवत्सरोकरो मन्त्रः प्रमाणं परमं तपः ।
योगी योज्यो महाबीजो महारेता महाबलः ॥
सुवर्णरेता सवर्ज्ञः सुबीजो बीजवाहनः ।
दशबाहुस्त्वनिमिषो नीलकण्ठ उमापतिः ॥
विश्वरूपः स्वयंश्रेष्ठो बलवीरोऽबलोगणः ।
गणकर्ता गणपतिर्दिग्वासाः काम एव च ॥
मन्त्रवित परमो मन्त्रः सर्वभाव करो हरः ।
कमण्डलुधरो धन्वी बाणहस्तः कपालवान् ॥
अशनीशतघ्नी खड्गी पट्टिशी चायुधीमहान् ।
स्रुवहस्तः सुरूपश्च तेजस्तेजस्करो निधिः ॥
उष्णीषी च सुवक्त्रश्च उदग्रो विनतस्तथा ।
दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च ॥

मृगालरूपः सिद्धार्थो मुण्डः सर्वशुभं करः ।
अजश्च बहुरूपश्च गन्धधारी कपर्द्यपि ॥
ऊर्ध्वरेता ऊर्ध्वलिङ्ग ऊर्ध्वशायीनभः स्थलः ।
त्रिजटी चीरवासाश्च रुद्रः सेनापतिर्विभुः ॥
अहश्चरो नक्तंचरिस्तग्ममन्युः सुवर्चसः ।
गजहा दत्याहा कालोलोकधाता गुणाकरः ॥
सिंहशार्दूलरूपश्च आर्द्रचर्माम्बरावृतः ।
कालयोगी महानादः सर्वकामश्चतुष्पथः ॥
निशाचरः प्रेतचारी भूतचारी महेश्वरः ।
बहुभूतो बहुधरः स्वर्भानुरमितो गतिः ॥
नृत्य प्रियो नित्यनर्तो नर्तकः सर्वलालसः ।
घोरो महातपाः पाशो नित्यो गिरिरूहो नमः ॥
सहस्रहस्तो विजयो व्यवसायोह्यतन्द्रितः ।
अघर्षणो घर्षणात्मा यज्ञहा कामनाशकः ॥
दक्षयागापहारी च सुसहोमध्यमस्तथा ।
तेजोऽपहारी बलहा मुदितोऽर्थोऽजितोऽवरः ॥
गम्भीर घोषो गम्भीरो गम्भीरबल वाहनः ।
न्यग्रोधरूपो न्यग्रोधो वृक्षकर्णस्थितिर्विभुः ॥
सुतीक्ष्ण दंशनश्चैव महाकायो महाननः ।
विष्वक्सेनो हरिर्यज्ञः संयुगापीडवाहनः ॥
तीक्ष्णतापश्च हर्यश्वः सहायः कर्मकालवित् ।
विष्णुप्रसादितो यज्ञः समुद्रो बडवामुखः ॥
हुताशन-सहायश्च प्रशान्तात्मा हुताशनः ।
उग्रतेजा महातेजा जन्यो विजय कालवित् ॥

ज्योतिषामयनं सिद्धिः सर्वविग्रह एव च।
शिखी मुण्डी जटी ज्वाली मूर्तिजो मूर्द्धगोबली ॥
वेणवी पणवी ताली खाली कालकटकटः।
नक्षत्र विग्रहमतिर्गुण-बुद्धिर्लयोऽगमः ॥
प्रजापतिर्विश्वबाहुर्विभागः सर्वगोऽमुखः।
विमोचनः सुसरणो हिरण्यकवचोद्भवः ॥
मेढजो बलचारी च महीचारी स्रुतस्तथा।
सर्वतूर्यनिनादी च सर्वातोद्यपरिग्रहः ॥
व्यालरूपो गुहावासी गुहो माली तरङ्गवित्।
त्रिदशस्त्रिकालधृक् कर्म-सर्वबन्ध विमोचनः ॥
बन्धनस्त्वसुरेन्द्राणां युधिशत्रु विनाशनः।
साङ्ख्यप्रसादो दुर्वासाः सर्वसाधुनिषेवितः ॥
प्रस्कन्दनो विभागज्ञोऽतुल्यो यज्ञविभागवित्।
सर्ववासः सर्वचारी दुर्वासा वासवोऽमरः ॥
हैमो हेमकरोऽयज्ञः सर्वधारी धरोत्तमः।
लोहिताक्षो महाक्षश्चविजयाक्षो विशारदः ॥
संग्रहो निग्राहःकर्त्ता सर्पचीर निवासनः।
मुख्योऽमुख्यश्चं देहश्च काहलिः सर्वकामदः ॥
सर्वकाल प्रसादश्च सुबलो बलरूपधृक्।
सर्वकामवरश्चैव सर्वदः सर्वतोमुखः ॥
आकाश-निर्विरूपाश्च निपातीह्यवशः खगः।
रौद्ररूपोंऽशु रादित्यो बहुरश्मिः सुवर्चसी ॥
वसु वेगो महावेगो मनोवेगो निशाचरः।

सर्ववासी श्रियावासी उपदेशकरोऽकरः ॥

मुनिरात्म-निरालोकः सम्भग्नश्च सहस्रदः ।
पक्षी च पक्षरूपश्च अतिदीप्तो विशाम्पतिः ॥
उन्मादोमदनः कामो ह्यश्वत्थोऽर्थकरो यशः ।
वामदेवश्च वामश्च प्राग्दक्षिणश्च वामनः ॥
सिद्धयोगी महर्षिश्च सिद्धार्थः सिद्धसाधकः ।
भिक्षुश्च भिक्षुरूपश्च विपणो मृदुरव्ययः ॥
महासेनो विशाखश्च षष्टिभागो गवां पतिः ।
वज्रहस्तश्च विष्कम्भी चमूस्तम्भन एव च ॥
वृत्ताऽवृत्तकरस्तालो मधुर्मधुक लोचनः ।
वाचस्पत्यो वाजसनो नित्यामाश्रमपूजितः ॥
ब्रह्मचारी लोकचारी सर्वचारी विचारवित् ।
ईशानः ईश्वरोकालो निशाचरी पिनाकवान् ॥
निमित्तस्थो निमित्तं च नन्दिर्नन्दि करो हरिः ।
नन्दीश्वरश्च नन्दी च नन्दनो नन्दवर्द्धनः ॥
भगहारी निहन्ता च कालोब्रह्मा पितामहः ।
चतुर्मुखो महालिङ्गश्चारुलिङ्गस्तथैव च ॥
लिङ्गाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः ।
बीजाध्यक्षो बीजकर्ता अध्यात्मानुगतो बलः ॥
इतिहासः सकल्पश्च गौतमोऽथ निशाकरः ।
दम्भो ह्यदम्भो वैदम्भो वश्यो वशकरः कलिः ॥
लोककर्ता पशुपतिर्महाकर्ता ह्यनौषधः ।
अक्षरं परमं ब्रह्म बलवच्छक्र एव च ॥
नीतिर्ह्यनीतिः शुद्धात्मा शुद्धो मान्योगता गतः ।
बहुप्रसादः सुस्वप्नो दर्पणोऽथ त्वमित्रजित् ॥

वेदकारो मन्त्र कारो विद्वान् समरमर्दनः।
महामेघ निवासी च महाघोरो वशीकरः॥
अग्निज्वालो महाज्वालो अतिधूम्रोहुतो हविः।
वृषणः शङ्करो नित्यं वर्चस्वी धूमकेतनः॥
नीलस्तथाङ्गलुब्धश्च शोभनो निरवग्रहः।
स्वस्तिदः स्वस्तिभावश्च भागी भागकरो लघुः॥
उत्सश्चङ्ग महाङ्गश्च महागर्भ परायणः।
कृष्ण वर्णः सुवर्णश्च इन्द्रियं सर्वदेहिनाम्॥
महापादो महाहस्तो महाकायो महायशाः।
महामूर्धा महामात्रो महानेत्रो निशालयः॥
महान्तको महाकर्णो महोष्ठश्च महाहनुः।
महानाशो महाकम्बुर्महाग्रीवः श्मशानभाक्॥
महावक्षा महोरस्को ह्यन्तरात्मा मृगालयः।
लम्बनो लम्बतोष्ठश्च महामायः पयोनिधिः॥
महादन्तो महादंष्ट्रो महाजिह्वो महामुखः।
महानखो महारोमा महाकोशो महाजटः॥
प्रसन्नश्च प्रसादश्च प्रत्ययो गिरिसाधनः।
स्नेहनोऽस्नेहनश्चैव अजितश्च महामुनिः॥
वृक्षाकारो वृक्षकेतुरनलो वायुवाहनः।
गण्डली मेरुधामा च देवाधिपतिरेव च॥
अथर्वशीर्षः सामास्य ऋक्सहस्रामितेक्षणः।
यजुः पादभुजो गुह्यः प्रकाशो जङ्गमस्तथा॥
अमोघार्थः प्रसादश्च अभिगम्य सुदर्शनः।
उपकारः प्रियः सर्वः कनकः काञ्चनच्छविः॥

नाभिर्नन्दिकरोभावः पुष्करस्थपतिः स्थिरः।
द्वादशस्त्रासनश्चाद्यो यज्ञो यज्ञसमाहितः॥
नक्तं कलिश्च कालश्च मकरः कालपूजितः।
सगणो गणकारश्च भूतवाहन सारथिः॥
भस्मशयो भस्मगोप्ता भस्मभूतस्तरुर्गणः।
लोकपालस्तथाऽलोको महात्मा सर्वपूजितः॥
शुक्लस्त्रिशुक्लः सम्पन्नः शुचिर्भूत निषेवितः।
आश्रमस्थः क्रियावस्थो विश्वकर्ममतिर्वरः॥
विशालशाखस्ताम्रोष्ठो ह्यम्बुजालः सुनिश्चलः।
कपिलः कपिशः शुक्ल आयुश्चैव परोऽपरः॥
गन्धर्वो ह्यदितिस्तार्क्ष्यः सुविज्ञेय सुशारदः।
परश्वधायुधो देवो अनुकारी सुबान्धवः॥
तुम्बवीणो महाक्रोध ऊर्ध्वरेता जलेशयः।
उग्रो वंशकरो वंशो वंशनादो ह्यनिन्दितः॥
सर्वाङ्गरूपो मायावी सुहृदो ह्यनिलोऽनलः।
बन्धनो बन्धकर्ता च सुबन्धन-विमोचनः॥
सयज्ञारिः सकामारिर्महादंष्ट्रो महायुधः।
बहुधा निन्दितः शर्वः शंकरः शंकरोऽधनः॥
अमरेशो महादेवो विश्वदेवः सुरारिहा।
अहिर्बुध्न्योऽनिलाभश्च चेकितानो हविस्तथा॥
अजैकपाच्च कापाली त्रिशङ्कुरजितः शिवः।
धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा॥
धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः।
प्रभावः सर्वगो वायुरर्यमा सविता रविः॥

उपङ्गश्च विधाता च मान्धाता भूतभावनः ।
विभुर्वर्णविभावी च सर्वकाम गुणावहः ॥
पद्मनाभो महागर्भश्चन्द्रवक्त्रोऽनिलोऽनलः ।
बलवांश्चोपशान्तश्च पुराणः पुण्यचञ्चुरी ॥
कुरुकर्ता कुरुवासी कुरुभूतो गुणौषधः ।
सर्वाशयो दर्भचारी सर्वेषां प्राणिनां पतिः ॥
देवदेवः सुखासक्तः सदसत्सर्वरत्नवित् ।
कैलाश गिरिवासी च हिमवद्गिरि संश्रयः ॥
कूलहारी कूलकर्ता बहुविद्यो बहुप्रदः ।
वणिजो वर्धकी वृक्षो बकुलश्चन्दनश्छदः ॥
सारग्रीवो महाजत्रुरलोलश्च महौषधः ।
सिद्धार्थकारी सिद्धर्थश्छन्दो व्याकरणोत्तरः ॥
सिंहनादः सिंहदंष्ट्रः सिंहगः सिंहवाहनः ।
प्रभावात्मा जगत्कालस्थालो लोकहितंस्तरूः ॥
सारङ्गो नवचक्राङ्गः केतुमाली सभावनः ।
भूतालयो भूतपतिरहोरात्रमनिन्दितः ॥
वाहिता सर्वभूतानां निलयश्च विभुर्भवः ।
अमोघः संयतो ह्यश्वो भोजनः प्राणधारणः ॥
धृतिमान् मतिमान् दक्षः सत्कृश्च युगाधिपः ।
गोपालिर्गोपतिर्ग्रामो गोचर्म वसनो हरिः ॥
हिरण्य बाहुश्च तथा गुहापालः प्रवेशिनाम् ।
प्रकृष्टारिर्महाहर्षो जितकामो जितेन्द्रियः ॥
गान्धारश्च सुवासश्च तपः सक्तो रतिर्नरः ।
महागीतोमहानृत्यो ह्यप्सरोगणसेवितः ॥

महाकेतु-र्महाधातु-र्नैकसानुचरश्चलः ।
आवेदनीयः आदेशः सर्वगन्ध सुखावहः ॥
तोरणस्तारणो वातः परिधीपतिखेचरः ।
संयोगो वर्द्धनो वृद्धो अतिवृद्धो गुणाधिकः ॥
नित्य आत्म सहायश्च देवासुर पतिः पतिः ।
युक्तश्चयुक्तबाहुश्च देवो दिविसुपर्वणः ॥
आषाढ़श्च सुषाढ़श्च ध्रुवोऽथहरिणो हरः ।
वपुरावर्त्तमानेभ्यो वसुश्रेष्ठो महापथः ॥
शिरोहारी विमर्शश्च सर्वलक्षणलक्षितः ।
अक्षश्च रथयागी च सर्वयोगी महाबलः ॥
समाम्नायोऽसमाम्नायस्तीर्थं देवो महारथः ।
निर्जीवो जीवनो मन्त्रः शुभाक्षो बहुकर्कशः ॥
रत्नप्रभतो रत्नाङ्गो महार्णवनिपानवित् ।
मूलं विशालो ह्यमृतो व्यक्ताऽव्यक्तस्तपोनिधिः ॥
आरोहणोऽधिरोहश्च शीलधारी महायशाः ।
सेनाकल्पो महाकल्पो योगो युगकरो हरिः ॥
युगरूपो महारूपो महानागहनोऽवधः ।
न्यायनिर्वपणः पादः पण्डितोह्यचलोपमः ॥
बहुमालो महामालः शशी हरसुलोचनः ।
विस्तारो लवणः कूपस्त्रियुगः सफलोदयः ॥
त्रिलोचनो विषण्णाङ्गो मणिविद्धो जटाधरः ।
बिन्दुर्विसर्गः सुमुखः शरः सर्वायुधः सहः ॥
निवेदनः सुखाजातः सुगन्धारो महाधनुः
गन्धपाली च भगवानुत्थानः सर्वकर्मणाम् ॥

मन्थानो बहुलो वायुः सकलः सर्वलोचनः ।
ततस्तालः करस्थाली ऊर्ध्वसंहननो महान् ॥
छत्रं सुछत्रो विख्यातो लोकः सर्वाश्रयः क्रमः ।
मुण्डो विरूपो विकृतो दण्डी कुण्डी विकुर्वणः ॥
हर्यक्षः ककुभोवज्री शतजिह्वः सहस्रपात् ।
सहस्रमूर्धा देवेन्द्रः सर्वदेवमयो गुरुः ॥
सहस्रबाहुः सर्वाङ्गः शरण्यः सर्वलोककृत् ।
पवित्र त्रिककुनमन्त्रः कनिष्ठः कृष्णपिङ्गलः ॥
ब्रह्मदण्ड-विनिर्माता शतघ्नी-पापशक्तिमान् ।
पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ॥
गभस्तिर्ब्रह्मकृद् ब्रह्मी ब्रह्मविद् ब्राह्मणो गतिः ।
अनन्तरूपो नैकात्मा तिग्मतेजाः स्वयम्भुवः ॥
ऊर्ध्वगात्मा पशुपतिर्वातरंहा मनोजवः ।
चन्दनी पद्मनालाग्रः सुरभ्युत्तरणो नरः ॥
कर्णिकार महास्रग्वी नीलमौलिः पिनाकधृत् ।
उमापतिरुमाकान्तो जाह्नवीधृदुमाधवः ॥
वरो वराहो वरदो वरेण्यः सुमहास्वनः ।
महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः ॥
पीतात्मा परमात्मा च प्रयतात्मा प्रधानधृत् ।
सर्वपार्श्वमुखत्र्यक्षो धर्मसाधारणो वरः ॥
चराचरात्मा सूक्ष्मात्मा अमृतो गोवृषेश्वरः ।
साध्यर्षिर्वसुरादित्यो विवस्वान् सवितामृतः ॥
व्यासः सर्गः सुसंक्षेपो विस्तरः पर्ययोनरः ।
ऋतुः सवंतसरो मासाः पक्षः संख्या समापनः ॥

कला: काष्ठा लवामात्रा मुहूर्ताहः क्षपा: क्षणा: ।
विश्वक्षेत्रं प्रजा बीजं लिङ्गमाद्यस्तु निर्गमः ॥
सदसद् व्यक्तं व्यक्तं पितामाता पितामहः ।
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ॥
निर्वाणं ह्लादनश्चैव ब्रह्मलोकः परागतिः ।
देवासुर विनिर्माता देवासुर परायणः ॥
देवासुगुरुर्देवो देवासुर नमस्कृतः ।
देवासुर महामात्रो देवासुर गणाश्रयः ॥
देवासुर गणाध्यक्षो देवासुर गणाग्रणीः ।
देवातिदेवो देवर्षिदेवासुरवरप्रदः ॥
देवासुरेश्वरो विश्वो देवासुरमहेश्वरः ।
सर्वदेवमयोऽचिन्त्यो देवतात्माऽऽत्मसम्भवः ॥
उद्भित त्रिविक्रमो वैद्यो विरजो नीरजोऽमरः ।
इड्यो हस्तीश्वरो व्याघ्रो देवसिंहो नरर्षभः ॥
विबुधोऽग्रवरः सूक्ष्मः सर्वदेवस्तपोमयः ।
सुयुक्तः शोभनो वज्री प्रासानां प्रभवोऽव्ययः ॥
गुहः कान्तो निजः सर्गः पवित्रं सर्वपावनः ।
भृङ्गी भृङ्ग प्रियो बभ्रू राजराजो निरामयः ॥
अभिरामः सुरगणो विरामः सर्व साधनः ।
ललाटाक्षो विश्वदेवो हरिणो ब्रह्मवर्चसः ॥
स्थावराणां पतिश्चैव नियमेन्द्रिय वर्धनः ।
सिद्धार्थः सिद्धभूतार्थोऽचिन्त्यः सत्यव्रतः शुचिः ॥
व्रताधिपः परंब्रह्म भक्तानां परमागतिः ।
विमुक्तो मुक्त तेजाश्च श्रीमान्श्रीवर्धनो जगत् ॥

यथा प्रधानं भगवानिति भक्त्या स्तुतो मया।
यन्न ब्रह्मादयो देवा विदुस्तत्त्वेन नर्षयः॥
स्तोतव्यमर्च्यं वन्द्यं च कः स्तोष्यति जगत्पतिम्।
भक्त्या त्वेवं पुरस्कृत्यमया यज्ञपति विभु॥
ततोऽभ्यनुज्ञां सम्प्राप्य स्तुतो मतिमतां वरः।
शिवमेभिः स्तुवन् देवं नामभिः पुष्टिवर्धनैः॥

फलश्रुति—नित्ययुक्ता शुचिर्भक्तः प्राप्वोत्यात्मान मात्मना।
एतद्धि परमं ब्रह्म परं ब्रह्माधिगच्छति।
ऋषयश्चैव देवाश्च स्तुवन्त्येतेन तत्परम्॥
स्तूयमानो महादेवस्तुष्यते नियतात्मभिः।
भक्तानुकम्पी भगवानात्मसंस्थाकरो विभुः॥
तथैव च मनुष्येषु ये मनुष्याः प्रधानतः।
आस्तिकाः श्रद्धावानश्च बहुभिर्जन्मभिः स्तवैः॥
भक्त्या ह्यनन्यमीशानं परं देवं सनातनम्।
कर्मणा मनसा वाचा भावना मित तेजसः॥
शयाना जाग्रमाणाश्च व्रजन्नुपविशंस्तथा।
उन्मिषन् निमिषश्चैव चिन्तयन्तः पुनः पुनः॥
शृण्वन्तः श्रावयन्तश्च कथयन्तश्च ते भवम्।
स्तुवन्तः स्तूयमानश्च तुष्यन्ति च रमन्ति च॥
जन्म कोटि सहस्रेषु नानासंसार योनिषु।
जन्तोर्विगतपापस्य भवे भक्ति प्रजायते॥
उत्पन्ना च भवे भक्तिरनन्या सर्वं भावतः।
[illegible]॥
निर्विघ्ना निश्चला रुद्रे भक्तिरव्यभिचारिणी॥

तस्यैव च प्रसादेन भावतरुत्पद्यते नृणाम्।
येन यान्ति परां सिद्धि तद्भावगत चेतसः ॥
ये सर्वभानुगताः प्रपद्यन्ते महेश्वरम्।
प्रपन्नवत्सलो देवः संसारात् तान् समुद्धरेत् ॥
एवमन्ये विकुर्वन्ति देवाः संसारमोचनम्।
मनुष्याणामृते देवं नान्या शक्तिस्तोबलम् ॥
इति तेनेन्द्रकल्पेन भगवान् सद् सत्पतिः।
कृत्तिः वासाः स्तुतः कृष्णतण्डिना शुभबुद्धिना ॥
स्तवमेतं भगवतो ब्रह्मा स्वयमधारयत्।
गीयते च स बुद्धयेत ब्रह्मा शंकर सन्निधौ ॥
इदं पुण्यं पवित्रं च सर्वदा पापनाशनम्।
योगदं मोक्षदं चैव स्वर्गदं तोपदं तथा ॥
एवमेतत् पठन्तेय एक भक्त्या तु शङ्करम्।
या गति सांख्य योगानां व्रजन्त्येतां गतिं तदा ॥
स्तवमेतं प्रयत्नेन सदा रुद्रस्य सन्निधौ।
अवद्मेकं चरेद् भक्तः प्राप्नुयादीप्सितं फलम् ॥
एतद् रहस्य परम ब्रह्मणो हृदि संस्थितम्।
ब्रह्मा प्रोवाच शक्राय शक्रः प्रोवाच मृत्यवे ॥
मृत्युः प्रोवाच रुद्रेभ्यो रुद्रेभ्यस्तण्डिमागमत्।
महता तपसा प्राप्तस्तण्डिना ब्रह्मसद्मनि ॥
तण्डिः प्रोवाच शुक्राय गौतमाय च भार्गवः।
वैवस्वताय मनवे गौतमः प्राह माधवः ॥
नारायणाय साध्याय समाधिष्ठाय धीमते।
यमाय प्राह भगवान् साध्यो नारायणोऽच्युतः ॥

नाचिकेताय भगवानाह वैवस्वतो यमः।
मार्कण्डेयाय वार्ष्णेय नाचिकेतोऽभ्यभाषत् ॥
मार्कण्डेयान्मया प्राप्तो नियमेन जनार्दन ! ।
तवाप्यहममिन्नघ्न स्तवं दद्यां ह्यविश्रुतम् ॥
स्वर्ग्यमारोग्यमायुष्यं धन्यं वेदेन सम्मितम् ।
नास्य विघ्नं विकुर्वन्ति दानवा यक्ष राक्षसाः ।
पिशाचा यातुधाना वा गुह्य का भुजगाअपि ॥
यः पठेत शुचिः पार्थ ब्रह्मचारी जितेन्द्रियः ।
अभग्नयोगो वर्षं तु सोऽश्वमेध फलम् लभेत् ॥

॥ इति श्री महाभारते अनुशासनपर्वणि तण्डिकृत शिवसहस्र नाम स्तोत्रं सम्पूर्णम् ॥

विष्णुकृत शिवसहस्रनाम

श्रूयतां भो ऋषि श्रेष्ठां येन तुष्टो महेश्वर।
तदहं कथयाम्यद्यशिव नाम सहस्रकम् ॥
शिवोहरो मृडो रुद्रः पुष्प लोचनः।
अर्थिगम्यः सदाचारः शर्वः शम्भुमहेश्वरः ॥
चन्द्रापीडश्च चन्द्रमौलिर्विश्वं विश्वम्भरेश्वरः।
वेदान्त सारस दोह कपाली नील लोहितः ॥
ध्यानाधरोऽपिरिच्छेद्यो गौरीभर्ता गणेश्वरः।
अष्ट मूर्ति विश्वमूर्ति स्वर्गः स्वर्ग साधनः ॥
ज्ञान ज्ञम्यो दृढ़प्रज्ञो देव देव त्रिलोचनः।
वाम देवो महा देवो पटुः परिदृढ़ोदृढ़ः ॥
विश्वरूपो विरूपाक्षो वागीशशुचिसत्तमः।
सर्वं प्रमाण संवादी वृषङ्को वृषवाहनः ॥
ईश पिनाकी खटवांगी चित्रवेपिश्चिरन्तनः।
तमोहरो महायोगी गोप्ता ब्रह्मण धुर्जटि ॥
काल कालः कृत्तिवासा सुभगः प्रणवात्मकः।
उन्नध्र पुरुषौजुष्योदुर्वासाः पुरशासनः ॥
दिव्यायुधः स्कन्द गुरुः परमेष्ठो परात्परः।
अनादि मध्य निधनो गिरीशो गिरिजाधवः ॥
कुवेर वन्धु श्रीकण्ठो लोक वर्णोत्तमो मृदुः।
[illegible] कोदण्डी नील कण्ठः परश्वधी ॥

विशालाक्षो मृग व्याघ्रः सुरेश सूर्य तापनः।
धर्माध्यक्षः क्षमाक्षेत्र भगवान् भगनेत्रभितं॥
उग्रः पशुपतिस्ताक्ष्यः प्रिय भक्तः परंतपः।
दाता दया करो दक्षः कपर्दी कामशासनः॥
श्मशान निलयः सूक्ष्मः श्मशानस्थः महेश्वरः।
लोककर्त्ता मृगपतिर्महकर्त्ता महौषधिः॥
सोमपोऽमृतपः सौम्यो महा तेजा महाद्युति।
तेजोमयोऽमृतमयोऽन्नमयश्च सुधापतिः॥
नीति सुनीतिः शुद्धात्मा सोमः सोमतर सुखी।
उत्तमो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः॥
अजातशत्रु अलोकसम्भाव्ये हव्यवाहनः।
लोकं करो वेदकरः सूत्रकारः सनातनः॥
पिनाकपाणिर्भूदेव स्वस्तिदः सुकृतसुधीः।
महर्षि कपिलाचार्यो विश्व दीप्तिस्त्रिलोचनः॥
धातृधापा धामकरः सर्वदः सर्वगोचरः।
ब्रह्मसृक सृकर्संगः कर्णिकारः प्रियः कविः॥
शाखो विशाखः गौशाखः शिवौः भिषगनुत्तमः।
गङ्गाप्लवोदकोभव्यः पुष्कलः, स्थापितः स्थिरः॥
विजितात्मा, विधेयात्मा भूतवाहन सारथिः।
सगणो गणकायश्च सुकीर्तिश्छिन्नसंशयः॥
कामदेवः कामपालो भस्मोद्धूलित विग्रहः।
भस्मप्रियो भस्मशायी कामीकान्तः कृतागमः॥
समावर्त्तो निवृत्तात्मा धर्मपुञ्जः सदाशिवः।
अकल्मषश्च पुण्यात्मा चतुर्बाहुर्दुरासदः॥

दुर्लभो दुर्गः सर्वायुध विशारदः ।
अध्यात्मयोगनिलय सुततुस्तुस्तुवर्द्धनः ॥
शुभांगोलोक सारङ्गी जगदीशो जनार्दनः ।
भस्मशुद्धीकरेऽभीरुरोजस्वी शुद्धविग्रहः ॥
असाध्यः साधुसाध्यश्च भृत्यमर्कटरूपधृक ।
हिरण्यसेतापौराणोरिपुजीवहरोवली ॥
महाह्रदो महागतः सिद्धो वृन्दारवन्दितः ।
व्याघ्रचर्माम्बरोव्यालो महाभूतो महानिधिः ॥
अमृतोऽमृतपः श्रीमान्पाञ्चजन्यः सुभाजनः ।
पञ्चविंशति तत्त्वस्थः पारिजातः परात्परः ॥
सुलभः सुव्रतः शूरोवांग मयैकनिधिर्निधिः ।
वर्णाश्रमगुरुर्वर्णी शत्रुजिच्छत्रु तापनः ॥
आश्रमः श्रमणः क्षामो ज्ञानवानचलेश्वरः ।
प्रमाणभूतो दुर्ज्ञेयः सुपर्णी वायुवाहनः ॥
धनुर्धरो धनुर्वेदो गुणः शशिगुणाः करः ।
सत्यसत्यपरोऽदीनो लज्जाङ्ग धर्मशासनः ॥
अनन्तदृष्टिरानन्दो दण्डोदमयिता दम ।
अभिचार्यो महामायो विश्वकर्म विशारण ॥
वीतारोगो विनीतात्मा तपस्वी भूतभावनः ।
उन्मत्तवेषः प्रच्छन्नो जितकामो जितेन्द्रियः ॥
कल्याण प्रकृति कल्प सर्वलोक प्रजापति ।
तपस्वी तारको धीमान्प्रधान प्रभुरव्यवय ॥
लोकपालोकऽन्तरात्मा च कल्पादि कमलेक्षणः ।
वेदशास्त्रार्थतत्त्वज्ञो नियमो नियताश्रमः ॥

चन्द्रः सूर्यं शनि केतुर्वरागं विद्रुमच्छविः ।
भक्तवश्यः परम्ब्रह्म मृगवाणार्पणोऽनघः ॥
अद्रि अद्रियालयः कान्तः परमात्मा जगद्गुरुः ।
सर्वकर्मालयस्तुष्टो मङ्गल्योमङ्गलावृतः ॥
महातपाः दीर्घतपाः स्थाविष्टः स्थविरोध्रुवः ।
अहः संवत्सरोव्याप्तिः प्रमाणं परमं तपः ॥
संवत्सरो मन्त्रः प्रत्ययः सर्वतापनः ।
अजः सर्वेश्वरः सिद्धो महातेजा महाबलः ॥
योगीयोग्यो महारेताः सर्वदिग्ग्रहः ।
वसुर्वसुमुनाः सत्यः सर्वपापहरोहरः ॥
सुकीर्त्तिः शोभनः सत्त्वो वेदाङ्गो वेद्विन्मुनिः ।
भ्राजिष्णुर्भोजनं भोक्ता लोकनाथो प्रतापवान् ॥
कमण्डलुधरो महामायाः सर्वावासश्चतुष्पथः ।
कालयोगी महानदो महोत्साहो महाबलः ॥
महाबुद्धिर्महावीर्यो भूतचर पुरन्दरः ।
निशाचरः प्रेतचारी महाशक्तिर्महाद्युतिः ॥
अनिर्देश्यवपुः श्रीमान्सर्वाचार्यो मनोगतिः ।
बहुश्रुतिर्महामायो नियतात्म ध्रुवोऽध्रुवः ॥
तेजस्तेजोद्युतिधरो जनकः सर्वशासनः ।
नृत्यप्रियो नित्यनृत्यः प्रकाशात्मा प्रकाशकः ॥
स्पष्टाक्षरो बुद्धो मन्त्रः समानः सारसप्लवः ।
युगादिकृतद्युगावर्तो गम्भीरो वृषवाहनः ॥
इष्टोविशिष्टः शिष्टे सुलभः सारशोधनः ।
तीर्थरूपो तीर्थनामा तीर्थदृश्यस्त तीर्थदः ॥

अपां निधिरधिष्ठान दुर्जयो जयकालवित् ।
प्रतिष्ठम: प्रमाणज्ञो हिरण्यकवचो हरि: ॥
विमोचन: सुरगणो विद्यशो विन्दुसंशय: ।
बालरूपोऽमलोऽवलोन्मत्त विकर्ता गहनोगुह: ॥
कारणं फारनं कर्त्ता सर्वबन्ध विमोचन: ।
व्यवसायो व्यवस्थान स्थान दो जगदादिज: ॥
गुरुदो ललितो भेदो नवात्मात्मनि संस्थित: ।
वीरेश्वरो वीरभद्रो वीरासन विधिगुरु: ॥
वीरचूडामणिर्वेता चिदानन्दो नन्दीश्वर: ।
आज्ञाधर स्त्रिशूली च शिपिविष्ठ: शिवालय: ॥
बालखिल्यो महावीरस्तिग्मांशुबधिर: खग: ।
अभिराम: सुशरण: सुब्रह्मण्य: सुधापति: ॥
मघवा कोशिको गोमान्विरत्म: सर्वसाधन: ।
ललाटाक्षो विश्वदेह: सार: संसारचक्र: भृत् ॥
अमोघदण्डो मध्यस्थो हरिणो ब्रह्मवर्चस: ।
परमार्थ: परमाचो संचयो व्याघ्र कोमल: ॥
रुचिर्वहुरुचिर्वैद्यो वांचस्पतिरहंस्पति: ।
रविर्विरोचन: स्कन्द शास्ता वैवस्वतोयम: ॥
युतिरुन्नतकीर्तिश्च सानुरागा: पुरञ्जन: ।
कैलासाधिपति: कान्त: सविता रविलोचन: ॥
विश्वोत्तमो वीतभयो विश्वभर्त्ता: ।
नित्यो नियत कल्याण: पुण्यश्रवण कीर्तन: ॥
दूरश्रवो विश्वसहो ध्येय: दु:स्वप्ननाशना ।
उत्तारणो दुष्कृतिहा विज्ञेयो दुःसहो भवः ॥

अनादिर्भूर्भुवोलक्ष्मी किरीटी त्रिदशाधिपः ।
विश्वगोप्ता विश्वकर्ता सुवीरो रुचिरोंगदः ॥
जननीजन जन्मादिः प्रीतिमान नीतिमानध्रुवः ।
वसिष्ठः कश्यपः भानुर्भीमो भीमपराक्रमः ॥
प्रणवः सत्यधाचारी महोकोशो महाधनः ।
जन्माधपो महादेव शकयागमपारगः ॥
तत्वं तत्वदेकात्मा विभुर्विष्णु विभूषणः ।
ऋषिर्ब्राह्मण ऐश्वर्य्यं जन्ममृत्युजरातिगः ॥
पञ्चतत्व समुत्पत्तिर्विश्वेशो विमलोदयः ।
अनाद्यन्तो ह्यात्मयोनिर्वत्सलो भूतलोकधृक ॥
गायत्री वल्लभः पार्शविश्वावासः प्रभाकरः ।
शिशुर्गिरिरतः सम्राट सुपर्णः सुरशत्रुहा ॥
अमोघोऽरिष्टनेमिश्च मुकुन्दी विगतज्वरः ।
स्वयंज्योतिर्महाज्योतिस्तनुज्योतिरचंचलः ॥
पिङ्गलः कपिलश्मश्रुर्भालनेत्रस्त्रयीत नूः ।
ज्ञानस्कन्धा महानीति विश्वोत्पत्तिरुपप्लवः ॥
भयो विवस्वानादित्यो गतपारी बृहस्पतिः ।
कल्याण गुणनामा च पापहापुण्यदर्शनः ॥
उदार कीर्तिरूद्योगी सद्योगी सदतस्त्रपः ।
नक्षत्रमाली नाकेशः स्वधिष्ठानः षडाश्रिय ॥
पवित्र पाप नाशश्च मणिपूरो नभोगतिः ।
हृत्पुण्डरींकमासीनः शक्रः शान्तिर्वृषकपिः ॥
उष्णो गृहपतिः कृष्णो समर्थोऽनर्थ नाशनः ।
अधर्म शत्रुरज्ञेय पुरुहुतः पुरश्रुतः ॥

ब्रह्मगर्भो बृहद्‍गर्भो धर्मदेनधनागमः ।
जगद्धितैषी सुगतः कुमारः कुशकागमः ॥
हिरण्यवर्णो ज्योतिष्मान्नानाभूतरतो ध्वनिः ।
आराज्ञो नयनाध्यक्षो विश्वामित्रो धनेश्वरः ॥
ब्रह्मज्योर्वसुधामा महाज्योतिरनुत्तमः ।
मातामहो मातारिश्वान् भस्वान्नामहारधृक् ॥
पुलस्त्यः पुलहोऽगस्त्यो जातुकर्ण्यः पराशरः ।
निरायरणनिर्वादो वैरञ्चयो विष्ठरश्रुवा ॥
आत्मभूरनिरुद्धोऽत्रिर्नार्मूर्तिर्मयशाः ।
लोकनीराग्रणीर्वीरश्चण्डः सत्यपराक्रमः ॥
व्यालकल्पो महाकल्पः कल्पवृक्षः कलाधरः ।
अलकारिष्णुरचलो रोचिष्णर्विक्रमोन्नतः ॥
आयुः शब्दपतिर्वाग्मी प्लवनः शिखिसारिथः ।
असस्पृष्टोऽतिथिः शत्रुः प्रमाथी पादपासनः ॥
वसु श्रवाहव्यवाहः प्रतप्तो विश्वभोजनः ।
जप्यो जरादि शमनो लोहिश्च तनूनपात् ॥
बृहदश्वो नभोयोनिः सुप्रतीकस्तमिस्रहा ।
निदाघस्तमन मेघस्वक्षः परस्पुरञ्जयः ॥
सुखानिलः सुनिष्पन्नः सुरभिः शिशिरात्मकः ।
वसन्तो माधवी ग्रीष्मो नभस्यो बीजवाहना ॥
अङ्गिरा गुरुरात्रेयो विमलो विश्ववाहनः ।
पावनः पुरजिच्छक्रस्त्रैविद्यो नरवाहणः ॥
मनोबुद्धिरहंकारः क्षेत्रज्ञः क्षेत्रपालकः ।
जमदग्निर्बलनिधिर्विशालो विश्वगालवः ॥

अधीरोऽनुत्तरो यज्ञः श्रेष्ठो निःश्रेयसप्रदः ।
शैलोगगन कुन्दाभो दानवारिररिन्दमः ॥
रजनी जनकश्चारु विः शल्यो लोकशल्यधृक ।
चतुर्वेदश्चतुर्भावश्चश्चतुरप्रियः ॥
आमनायोऽथ समान्नायस्तीर्थ देवः शिवालयः ।
बहुरूपो महारूपः सर्वरूपश्चराचरः ॥
न्याय निर्यायको नेयो न्यागम्यो निरंजनः ।
सहस्रमूर्द्धा देवेन्द्रः सर्वशास्त्र प्रभञ्जनः ॥
मुण्डी विरूपो विकृतो दण्डी दानी गुणोत्तमः ।
पिङ्गलाक्षो जनाध्यक्षो नीलग्रीवो निरामयः ॥
सहस्रबाहु सर्वेश शरण्य सर्वलोकधृक् ।
पदमासनः परमज्योतिः पारम्पर्य्यफलप्रदः ॥
पदमगर्भो महागर्भो विश्वगर्भो विचक्षणः ।
परावरज्ञो वरदो वरेण्यश्च महास्वन ॥
देवासुर गुरुर्देवो देवासुर नमस्कृत्यः ।
देवासुरमहामित्रो देवासुर महेश्वरः ॥
देवासुरेश्वरो दिव्यो सुरमहाश्रयः ।
देवदेवोऽनयोऽचिन्त्यो देवतात्मात्मसम्भवः ॥
सद्योनिर्ह्यसुर व्याघ्रो देवसिंहो दिवाकरः ।
विबुधाग्रवरः श्रेष्ठः सर्वदेवोत्तमोत्तमः ॥
शिवज्ञानरतः श्रीमांछिखी श्रीपर्वत प्रियः ।
वज्रहस्तः सिद्धिखड्गो नरसिंहनिपातनः ॥
ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः ।
नन्दी नन्दीश्वरोऽनन्तो नग्नवृत्ति धरः ॥

लिङ्गाध्यक्षो सुराध्यक्षो योगाध्यक्षो युगावह्।
स्वर्धामा स्वर्गतः स्वर्गीस्वर स्वरमय स्वनः॥
वाणाध्यक्षो बीजकर्ता कर्मकृद्धर्मसम्भवः।
दम्भो लोभोऽर्थं वै शम्भुः सर्वभूत महेश्वरः॥
श्मशान निलयस्त्र्यक्षः सेतुरप्रतिमाकृतिः।
लोकोत्तर स्फटो लोकस्त्र्यम्बको नागभूषणः॥
अन्धकारिमंखद्वेषी विष्णुकन्धरपातनः।
हीनदोषोऽक्षय गुणो दक्षारिः पूणदन्तभित्॥
पूर्णं पूरयिता पुण्यः सुकमारः सुलोचनः।
- सागमेय प्रिय अक्रूरः पुण्यकीर्तिरनामयः॥
मनोजवः तीर्थंकरो जटिलो जीवितेश्वरः।
जीवितान्तकरो नित्यो वसुरेता वसुपदः॥
सद्गतिः सिद्धिनिः सिद्धः सज्जाति खलकंटकः।
कलाधारो महाकाल भूतः सत्यपरायणः॥
लोकलावण्यकर्ता च लोकोत्तर सुखालयः।
चन्द्र संजीवन शास्ता लोकगूढ़ः महाधिपः॥
लोकवन्धुर्लोकनाथः कृतिज्ञः कृतिभूषितः।
अनपायोऽक्षरः कान्तः सर्वशास्त्रभृतां वरः॥
तेजोमयोद्युतिधरो लोकनामग्रणीः अणुः।
शुचिस्मितः प्रसन्नात्मा दुजर्यो दुरितक्रमः॥
ज्योतिर्मयो जगन्नाथो निराकारो जलेश्वरः।
तुम्बवीणो महाकोयः विशोकः शोकनाशनः॥
त्रिलोपकस्त्रिलोकेशः सर्वशुद्धिरधोक्षजः।

अव्यक्त लक्षणो देवो व्यक्तिऽव्यक्तो विशांपतिः॥

परः शिवो वसुर्नारासारोमानधरो मयः।
ब्रह्मा विष्णु प्रजापालो हंसो हंसगतिर्वयः॥
वेधाविधाता धाता च सृष्टा हर्ता चतुर्मुख।
कैलासशिखरावासी सर्वावासी सदागतिः॥
हिरण्यगर्भो द्रुहिणो भूतपालोऽथ भूपतिः।
सद्योगी योगविद्योगी वरदो ब्राह्मण प्रियः॥
देव प्रिये देवनाथो देवज्ञः देव चिन्तकः।
विषमाक्षो विरूपाक्षो वृषदो वृषवर्द्धनः॥
निर्ममो निरहंकारो निर्मोही निरूपद्रवः।
दर्पहा दृप्तः सर्वर्तुपरिवर्त्तकः॥
सहस्रार्चिर्भूतिभषः स्निग्धाकृतिर दक्षिणः।
भूतभव्य भवन्नाथो विभवो भूति नाशनः॥
अर्थोऽनर्थो महोकोशः परकार्येक पण्डितः।
निष्कण्टकः कृतानन्दो तिर्व्यंजो व्याजमर्दनः॥
सत्यवान्सात्विकः सत्यः कृतस्नेह कृतागमः।
अकम्पितो गुणग्राही नैकात्मा नैक कर्मकृत॥
सुप्रीतः सुखदः सूक्ष्म सुकरो दक्षिणानिलः।
नन्दिस्कन्धवरो धुर्य्यः प्रकटः प्रीति बन्धनः॥
अपराजितः सर्वसहो गोविन्दः सत्ववाहनः।
अधृतः स्वधृतः सिद्धः पूतमूर्तियंशोधनः॥
वाराह शृङ्गधृक शृङ्गी बलवानेक नायकः।
श्रुतिप्रकाशः श्रुतिमानेक बन्धुरनेक कृत॥
श्री वत्सल शिवारम्भः शान्तभद्रः समोयशः।
भूशयो भूषणो भतिर्मूर्तिकृद् भूत भावनः॥

अकम्पो भक्तिकायस्तु कालहानि काल विभुः।
सत्यवृता मना त्यागी नित्यः शान्त परायणः॥
परार्थवृत्तिर्वरदो विरक्तस्तु विशारदः।
शुभदः शुभ कर्त्ता च शुभ नामा शुभ स्वयम्॥
अनर्थितो गुणग्राही ह्ययकर्त्तांकनक प्रभः।
स्वभाव भद्रो मध्यस्थः शत्रुघ्नो विघ्ननाशनः॥
शिखण्डी कवची शूली जटी मुण्डी च कुण्डली।
अमृत्यु सर्वहृक सिंहस्तजोराशिर्महामणिः॥
असंख्येयोऽप्रमेयात्मा वीर्यवान वीर्य कोविदः।
वेद्यश्च वै वियोगात्मा परावर मुनिश्वरः॥
अनुत्तोमो दुराधर्षो मधुरः प्रिय दर्शनः।
सुरेशः स्मरणः शर्व शब्दः प्रतप्ता परं॥
काल पक्षः काल कालः सुकृति कृत वासुकिः।
महेष्वासो महीभर्त्ता निष्कलङ्कौ विश्रंखलः॥
द्युतिमणिस्तर णिर्धन्यः सिद्धिदः सिद्धि साधनः।
वश्वतः सतः स्तुत्या न्यूणोनस्को महाभुजः॥
जर्मयोनिर्निरातङ्को नर नरायण प्रियः।
निर्लेपो यति सङ्गात्मा निर्व्यङ्गोव्यत्त नाशनः॥
स्वतः स्तुति प्रियः स्तोताव्यासमूर्ति निराकुलः।
निवद्यमयो पायो विद्याराशिश्च सत्कृतः॥
प्रशान्त बुद्धिरक्षण्णः संग्रहो नित्य सुन्दरः।
वैयाघ्र धुर्यो धात्रीसः शाकल्यः शर्वरीपतिः॥
मनमार्थ गुरुदत्तः शरीश्रितवत्सलः।
सोमो रसज्ञो रसदः सर्वसत्वावलम्बनः॥
एवं नाम्नां सहस्रेण तुष्टावहि हर हरिः।
प्रार्थबामांसम्भुर्वैपूजयामास पंकजैः॥

शिवस्वरूप भैरव सहस्रनाम स्तोत्रम्

ॐ अस्य श्री वटुक भैरव सहस्रनाम स्तोत्रस्य दुर्वासा ऋषिः अनुष्टुप-छन्दः श्री वटुकनाथो भैरवो देवता, मम सर्वकार्य सिद्ध्यर्थं, सर्वशत्रु निवारणार्थं श्री वटुक भैरव सहस्रनाम पाठमहं करिष्य ।

सहस्रनामानि

ॐ नमो भैरवरूपाय भैरवाय नमो नमः ।
नमो भद्र स्वरूपाय जगदाद्य नमो नमः ॥
नमः कल्पस्वरूपाय विकल्पाय नमो नमः ।
नमः शुद्ध स्वरूपाय सुप्रकाशाय ते नमः ॥
नमः कंकालरूपाय कालरूपी नमोस्तुते ।
नमः त्र्यंबकरूपाय महाकालाय ते नमः ॥
नमः संसार साराय शारदाय नमो नमः ।
नमो भैरव रूपाय भैरवाय नमो नमः ॥
नमः क्षेत्रनिवासाय क्षेत्रपालाय ते नमः ।
क्षेत्राक्षेत्र स्वरूपाय क्षेत्रकर्त्रे नमो नमः ॥
नमो नाम विनाशाय भैरवाय नमो नमः ।
नमो मातंग रूपाय भाररूपी नमो नमः ॥
नमः सिद्ध स्वरूपाय सिद्धिदाय नमो नमः ।
नमो बिन्दु स्वरूपाय बिन्दु [illegible] ॥
नमो मंगलरूपाय [illegible] नमो नमः ।
नमः संकष्ट नाशाय शंकराय नमो नमः ॥

नमो धर्मस्वरूपाय धर्मदाय नमो नमः ।
नमो तंतस्वरूपाय एकरूप नमोस्तुते ॥
नमो वृद्धिस्वरूपाय वृद्धिकार नमोस्तुते ।
नमो मोहनरूपाय मोक्षरूपाय ते नमः ॥
नमो जलदरूपाय शामरूप नमोस्तुते ।
नमः स्थुलस्वरूपाय शुद्धरूपाय ते नमः ॥
नमो नीलस्वरूपाय रंगरूपाय ते नमः ।
नमो मंडलरूपाय मंडलाय नमो नमः ॥
नमो रुद्रस्वरूपाय रुद्रगाथाय ते नमः ।
नमो ब्रह्मस्वरूपाय ब्रह्मवक्त्रे नमो नमः ॥
नमः त्रिशूलधराय धराधारिन्नमोस्तुते ।
नमः संसारबीजाय विरूपाय नमो नमः ॥
नमः विमलरूपाय भैरवाय नमो नमः ।
नमो जंगमरूपाय जलजाय नमो नमः ॥
नमः कालस्वरूपाय कालरूद्राय ते नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥
नमः शत्रु विनाशाय भीषनाय नमो नमः ।
नमः शांताय दांताय भ्रमरूप नमोस्तु ते ॥
न्यायगम्याय शुद्धाय योगिध्येयाय ते नमः ।
नमः कमलकांताय कालवृद्धाय ते नमः ॥
नमो ज्योतिस्वरूपाय सुप्रकाशाय ते नमः ।
नमो कल्पस्वरूपाय भैरवाय नमो नमः ॥
नमो जयस्वरूपाय जगज्जाड्य निवारणे ।
महाभूताय भूताय भूतानां पतये नमः ॥

नमो नन्दाय वृन्दाय वादिने ब्रह्मवादिने ।
नमो वादस्वरूपाय न्यायगम्याय ते नमः ॥
नमो भवस्वरूपाय मायानिर्माण रूपिणे ।
विश्ववंद्याय वंद्याय विश्वभराय ते नमः ॥
नमो नेत्र स्वरूपाय नेत्र रूपिन्नमोस्तुते ।
नमो वरुणरूपाय भैरवाय नमो नमः ॥
नमो यमस्वरूपाय वृद्धरूपाय ते नमः ।
नमः कुवेररूपाय कालनाथाय ते नमः ॥
नमः ईशानरूपाय अग्निरूपाय ते नमः ।
नमो वायूस्वरूपाय विश्वरूपाय ते नमः ॥
नमः प्राणस्वरूपाय प्राणाधिपतये नमः ।
नमः संहाररूपाय पालनाय नमो नमः ॥
नमः चन्द्रस्वरूपाय चण्डरूपाय ते नमः ।
नमो मंदरवासाय सर्वयोगिनाम वासिने ॥
योगिगम्याय योग्याय योगिनांपतये नमः ।
नमो जंगमवासाय वामदेवाय ते नमः ॥
नमः शत्रु विनाशाय नीलकण्ठाय ते नमः ।
नमो भक्तिविनोदाय दुर्भगाय नमो नमः ॥
नमो मान्य स्वरूपाय मानदाय नमो नमः ।
नमो भूतिविभूपाय भूषिताय नमो नमः ॥
नमो रजस्वरूपाय सात्त्विकाय नमो नमः ।
नमस्तायस्वरूपाय तारणाय नमो नमः ॥
नमो गंगा विनादाय जटासंधारिणे नमः ।
नमो भैरव रूपाय भीषणाय नमो नमः ॥

नमः संग्रामरूपाय संग्राम जयदायिने ।
संग्रामसाररूपाय यवनाय नमो नमः ॥
नमो वृद्धि स्वरूपाय वृद्धिदाय नमो नमः ।
नमः त्रिशूलहस्ताय शूलसंहारिणे नमः ॥
नमो द्वंदुस्वरूपाय रूपदाय नमः नमः ।
नमः शत्रुविनाशाय शत्रुयुद्ध विनाशिने ॥
महाकालाय कालाय कालनाथाय ते नमः ।
नमो भैरव रूपाय भैरवाय नमः नमः ॥
नमः शुभस्वरूपाय शुभरूपिन्नमोस्तुते ।
नमः कमलहस्ताय डमरूहस्ताय ते नमः ॥
नमः कुक्कर वाहनाय वहनाय नमो नमः ।
नमो विमल नेत्राय त्रिनेत्राय नमो नमः ॥
नमः संसाररूपाय सारमेयाय वाहिने ।
संसार ज्ञाननाथाय ज्ञानरूपाय ते नमः ॥
नमो मंगलरूपाय मंगलाय नमो नमः ।
नमो न्यायविशालाय मन्त्ररूपाय ते नमः ॥
नमो यन्त्रस्वरूपाय यन्त्रधारिन्नमोस्तुते ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥
नमः कलंकरूपाय कलंकाय नमो नमः ।
नमः संसार पाराय भैरवाय नमो नमः ॥
रूण्डमाल विभूषणाय भीषणाय नमो नमः ।
नमो दुःख निवाराय विपाराय नमो नमः ॥
नमो क्षण स्वरूपाय क्षणरूपाय ते नमः ।

नमो मुहूर्तरूपाय विहाराय नमो नमः ॥

नमो मोद स्वरूपाय श्रोणरूपाय ते नमः ।
नमो नक्षत्ररूपाय क्षेत्ररूपाय ते नमः ॥
नमो विष्णुस्वरूपाय विन्दुरूपाय ते नमः ।
नमो ब्रह्मस्वरूपाय ब्रह्मचारिन्नमोस्तुते ॥
नमः कंथा निवासाय पटवासाय ते नमः ।
नमो ज्वलनरूपाय ज्वलनाय नमो नमः ॥
नमो वटुक रूपाय धूर्तरूपाय ते नमः ।
नमो भैरव रूपाय भैरवाय नमो नमः ॥
नमो वैद्यस्वरूपाय वैद्यरूपिन्नमोस्तुते ।
नमो औषधरूपाय औषधाय नमो नमः ॥
नमो व्याधि निवाराय व्याधिरूपिन्नमो नमः ।
नमो द्वारनिवाराय ज्वररूपाय ते नमः ॥
नमो रुद्रस्वरूपाय रुद्रानांपतये नमः ।
विरूपाक्षाय देवाय भैरवाय नमो नमः ॥
नमो ग्रहस्वरूपाय ग्रहानांपतये नमः ।
नमः पवित्रधाराय परशुधाराय ते नमः ॥
यज्ञोपवीत देवाय देव देव नमोस्तुते ।
नमो यज्ञस्वरूपाय यज्ञानां फलदायिने ॥
नमो रणप्रतापाय तापनाय नमो नमः ।
नमो गणेशरूपाय गणरूपाय ते नमः ॥
नमो रश्मिस्वरूपाय रश्मिरूपाय ते नमः ।
नमो विभक्तिरूपाय विमलाय नमो नमः ॥
नमो रश्मिरूपाय मलयरूपाय ते नमः ।
नमो मधुररूपाय माधिपूर्णकलापिने ॥

कालेश्वराय कालाय कालनाथाय ते नमः ।
नमो विश्व प्रकाशाय भैरवाय नमो नमः ॥
नमो वृषस्वरूपाय कर्मरूपाय ते नमः ।
नमो वेदांत वेद्याय वेद सिद्धांतसारिणे ॥
नमो योनिस्वरूपाय भ्रातृरूपाय ते नमः ।
नमो भोगस्वरूपाय भैरवाय नमो नमः ॥
नमः शाखा प्रकाशाय पुरुषाय नमो नमः ।
नमः प्रकृतिरूपाय भैरवाय नमो नमः ॥
नमो विश्वस्वरूपाय शिवरूपाय ते नमः ।
नमो ज्योतिस्वरूपाय निर्गुणाय नमो नमः ॥
निरंजनाय शांताय निर्विकाराय ते नमः ।
निर्ममाय विमोहाय विश्वनाथाय ते नमः ॥
नमः कण्ठप्रकाशाय शत्रुनाशाय ते नमः ।
नमो आशाप्रकाशाय आशापूर कृते नमः ॥
नमो मत्स्यस्वरूपाय योगरूपाय ते नमः ।
नमो वाराहरूपाय वामनाय नमो नमः ॥
नमो आनन्दरूपाय आनन्दाय नमो नमः ।
नमः अनर्घकेशाय ज्वलत्केशाय ते नमः ॥
नमः पापविमोक्षाय मोक्षाय नमो नमः ।
नमः कैलाश नाथाय कालनाथाय ते नमः ॥
नमो विदुर्दविदाय विदुभाय नमो नमः ।
नमः प्रणवरूपाय भैरवाय नमो नमः ॥
नमो मेरुनिवासाय [illegible] ते नमः ।

नमो मेरुस्वरूपाय भैरवाय नमो नमः ॥

नमो भद्रस्वरूपाय भद्ररूपाय ते नमः।
नमो योगिस्वरूपाय योगिनां रूपाय नमः॥
नमो मैत्रस्वरूपाय मित्ररूपाय नमो नमः।
नमो ब्रह्मनिवासाय काशीनाशाय ते नमः॥
नमो ब्रह्माण्डवासाय ब्रह्मवासाय ते नमः।
नमो मातंगवासाय सूक्ष्मवासाय ते नमः॥
नमो मातृनिवासाय भ्रातृवासाय ते नमः।
नमो जगन्निवासाय जलावासाय ते नमः॥
नमः कौलनिवासाय नेत्रवासाय ते नमः।
नमो भैरववासाय भैरवाय नमो नमः॥
नमो समुंद्रवासाय वह्नि वासाय ते नमः।
नमश्चन्द्र निवासाय चन्द्रवासाय ते नमः॥
नमः कलिंगवासाय कलिगाय नमो नमः।
नमः उत्कलवासाय महेन्द्रवासाय ते नमः॥
नमः कपूर्वासाय सिद्धिवासाय ते नमः।
नमः सुन्दरवासाय भैरवाव नमो नमः॥
नमः आकाश वासाय सर्वयोगिनां वासिने।
नमो ब्रह्मणवासाय शूद्रवासाय ते नमः॥
नमः क्षत्रियवासाय वैश्यवासाय ते नमः।
नमः पक्षिनिवासाय भैरवाय नमो नमः॥
नमः पातामूलाय मूलावासाय ते नमः।
नमो रसातल वासाय सर्वपाताल वासिने॥
नमः कंकाल वासाय कंकवासायते नमः।
नमो मंत्र निवासाय भैरवाय नमो नमः॥

नमोऽहङ्कार रूपाय राजो रूपाय ते नमः।
नमः सत्व निवासाय भैरवाय नमो नमः॥
नमो नलिर्नरूपाय नलिनांग प्रकाशिने।
नमः सूर्य स्वरूपाय भैरवाय नमो नमः॥
नमो दृष्ट निवासाय साधुपायन रूपिणे।
नमो नभ्र स्वरूपाय स्तंभनाय नमो नमः॥
पंच योनि प्रकाशाय चतुर्योनि प्रकाशिने।
नवयोनि प्रकाशाय भैरवाय नमो नमः॥
नमः षोडश रूपाय नमः षोडश धारिणे।
चतुःषष्टि प्रकाशाय भैरवाय नमो नमः॥
नमोर्विदु प्रकाशाय सुप्रकाशाय ते नमः।
नमो गणस्वरूपाय सुखरूपनमोऽस्तुते॥
नमो अम्बर रूपाय भैरवाय नमो नमः।
नमो नाना स्वरूपाय मुख रूप नमोऽस्तुते॥
नमो दुर्ग स्वरूपाय दुखहंत्रे नमोऽस्तुते।
नमो विशुद्ध देहाय दिव्यदेहाय ते नमः॥
नमो भैरव रूपाय भैरवाय नमो नमः।
नमः प्रेत निवासाय पिशाचाय नमो नमः॥
नमो दिशा प्रकाशाय निशा रूप नमोऽस्तुते।
नमः सोमाधे रामाय धराधीशाय ते नमः॥
नमः संसार भाराय भारकाय नमो नमः।
नमो देह स्वरूपाय अदेहाय नमो नमः॥
देव देहाय देवाय भैरवाय नमो नमः।
विश्वेश्वराय विश्वाय विश्वधारिन्नमोऽस्तुते॥

स्वप्रकाश प्रकाशाय भैरवाय नमो नमः ।
स्थितिरूपाय स्थित्याय स्थित्तीनां पतये नमः ॥
सुस्थिराय सुकेशाय केशवाय नमो नमः ।
स्थविष्टाय गरिष्टाय प्रेष्ठाय परमात्मने ॥
नमो भैरव रूपाय भैरवाय नमो नमः ।
नमः पारद रूपाय पवित्राय नमो नमः ॥
नमो वेधक रूपाय अनिदाय नमो नमः ।
नमः शब्दस्वरूपाय शब्दातीताय ते नमः ॥
नमो भैरव रूपाय भैरवाय नमो नमः ।
नमो निंदा स्वरूपाय अनिदाय नमो नमः ॥
नमो विश्वरूपाय भैरवाय नमो नमः ।
नमः शरण्य शरण शरण्यानां सुखाय ते ॥
नमः शरण्य रक्षाय भैरवाय नमो नमः ।
नमः स्वाहास्वरूपाय स्वधारूपाय ते नमः ॥
नमो वौषट् स्वरूपाय भैरवाय नमो नमः ।
अक्षराय नमस्तुभ्यं त्रिधामात्रास्वरूपिणे ॥
नमो अक्षराय शुद्धाय भैरवाय नमो नमः ।
अर्धं मात्राय पूर्णाय पूर्णाय ते नमो नमः ॥
नमो भैरव रूपाय भैरवाय नमो नमः ।
नमोऽष्टचत्ररूपाय ब्रह्मरूपाय ते नमः ॥
नमो भैरव रूपाय भैरवाय नमो नमः ।
नमः सृष्टिस्वरूपाय सृष्टि कर्त्रे महात्मने ॥
नमः पालयस्वरूपाय भैरवाय नमो नमः ।
नमः सिद्धाय शान्ताय भैरवाय नमो नमः ॥

नमो धारास्यरूपाय खड्गहस्ताय ते नमः।
सनातनाय नित्याय निर्गुणाय गुणाय ते ॥
नमस्त्रिशूलहस्ताय भैरवाय नमो नमः।
नमः कुण्डल वर्णाय शवमुंड विभूषिणे ॥
महा क्रुद्धाय चंडाय भैरवाय नमो नमः।
नमो वासुकिभूपाय सर्प भूषाय ते नमः ॥
नमः कपालहस्ताय भैरवाय नमो नमः।
पान पात्र प्रमत्ताय मत्तरूपाय ते नमः ॥
नमो भैरव रूपाय भैरवाय नमो नमः।
मद्यककार सुयर्णाय माधवाय नमो नमः ॥
नमो मांगल्यरूपाय भैरवांय नमो नमः।
नमः कुमार रूपाय स्त्रीस्वरूपाय नमो नमः ॥
नमो गंध स्वरूपाय भैरवाय नमो नमः।
नमो दुर्गंधरूपाय सुगंधाय नमो नमः ॥
नमः पुष्प स्वरूपाय पुष्प भूषण ते नमः।
नमः पुष्प प्रकाशाय भैरवाय नमो नमः ॥
नमः पुष्प विनोदाय पुष्प पूजाय ते नमः।
नमो भक्ति निवासाय भक्त दुख निवारणे ॥
भक्त प्रियाय शांताय भैरवाय नमो नमः।
नमो भक्त स्वरूपाय रूपदाय नमो नमः ॥
नमो भैरव रूपाय भैरवाय नमो नमः।
नमो वासाय भद्राय वीरभद्राय ते नमः ॥
नमः संग्राम साराय भैरवाय नमो नमः।
नमः सड्वांगहस्ताय कालहस्ताय ते नमः ॥

नमो ऽघोराय घोराय घोरा घोरस्वरूपिणे ।
घोर घर्माराय घोराय भैरवाय नमो नमः ॥
घोर त्रिशूल हस्ताय घोर पानाय ते नमः ।
घोर रूपाय नील रूपाय भैरवाय नमो नमः ॥
घोर वाहन गम्याय अगम्याय नमो नमः ।
घोर ब्रह्म स्वरूपाय भैरवाय नमो नमः ॥
घोर शब्दाय घोराय घोर देहाय ते नमः ।
घोर द्रव्याय घोराय भैरवाय नमो नमः ॥
घोर संहाय सिंहाय सिंसिंहाय ते नमः ।
नमः प्रचण्ड सिंहाय सिंहरूपाय ते नमः ॥
नमः सिंह प्रकाशाय सुप्रकाशाय ते नमः ।
नमो विजय रूपाय जगदाद्य नमो नमः ॥
नमो भार्गव रूपाय गर्भरूपाय ते नमः ।
नमो भैरव रूपाय भैरवाय नमो नमः ॥
नमो मेध्याय शुद्धाय मायाधीशाय ते नमः ।
नमो मेध प्रकाशाय भैरवाय नमो नमः ॥
